

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः


M - 226
Checked 2012
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र. M 226 विषय
नांव (mss)
लेखक / लिपीकार
पृष्ठ 56 पूर्ण / अपूर्ण
M - 226

दुर्वा त्रिमंत्र काडात्कांडात्परोहंति परुषः परुषः परि एवा
नो दुर्वे प्रतनु सहस्त्रेण शतेन च दुर्वामादाय यानाते न प्रत
नो षि सहस्त्रेण विरोहसि तस्यास्ते देवी ष्टके विधेम हविषा
वयं दुर्वामृर्द्धि प्रतिष्टाप्य मृत्तिके हन मे पापं यन्मया दुष्कृ
तं कृतं मृत्तिके ब्रह्मदत्तासी काश्यपेनाभिमंत्रिता मृत्तिके दे
हि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं मृत्तिके प्रतिष्ठिते सर्वं तन्मे
निर्णुद मृत्तिके तया हतेन पापेन गच्छामि परमां गतिं मृद

वनेवने नासामृषभपत्नीनां पवित्रं कायशोधनं तन्मे रोगां
श्वशोकांश्च नुद गोमय सर्वदा। शिरः प्रभृत्यंगानि विलिप्य
स्नात्वाचम्य ततो मृत्तिकास्नानं अश्वक्रांते रथक्रांते विष्णु
क्रांते वसुंधरा शिरसा धारयिष्यामि रक्षस्व मां पदे पदे। भूमि
मभिमंत्र्य भूमिर्धेनुर्धरणी लोकधारिणी उद्धृतासि वरा
हेण कृष्णेन शतबाहुना। लोष्टमादाय सहस्रपरमा देवी श
तमूला शतांकुरा। सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी

मभिमंत्र्य यत इंद्र भयामहे ततो नो अभयं कृधि मघव
च्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि प्राची स्वस्ति
दा विश्वस्य निर्वृत्रहा विमृधो वशी वृषेंद्रः पुर एतु नः स्वस्ति
दा अभयंकरः दक्षिणायै दिशे नमः स्वस्ति न इंद्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति
नो बृहस्पतिर्दधातु प्रतीच्यै आपांतमन्युस्तृपलप्रभर्मा
धुनिः शिमीवांछरुमाँ ऋजीषी सोमो विश्वान्यतसाव

नानि नार्वागिंद्र प्रतिमानानि देभुः उदीचैर्ब्रह्मजज्ञानंप्र

थमं पुरस्ताद्वि सीमतः सुरुचोवेन आवः सबुध्निया उपमा

अस्य विष्टाः सतश्च योनिमसतश्चविवः उर्ध्वायै॰ स्योना

पृथिवि नो भवान्नृक्षरा निवेशानी यच्छानः शर्म सप्रथाः

भूम्यै नमः लोष्टमुत्क्षिप्य गंधद्वारां दुराधर्षां नित्यपुष्टां क

रीषिणीं ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं आदित्या

यदर्शयित्वा श्रीर्मे भजतु ललाटमालिख्य अलक्ष्मीर्मे नश्य

४

तु प्रदक्षिणं शिरो विलिप्य विष्णुमुखा वै देवाश्छंदोभिरिमं

लोकाननपजय्यमभ्यजयन् मुखे मह्यं॰ इंद्रो वज्रं बाहुः शं

उशीः शर्म यच्छतु स्वस्तिनो मघवा करोतु हंतु पाप्मानं योस्मा

द्वेष्टि॥ बाहुवोः सोमानं॰ स्वरणं कृणुहि ब्रह्मणस्पते कक्षी

वंतं य औशिजं कुक्ष्योः शरीरं यज्ञशमलं कुसीदं तस्मिन्सी

दतु योस्मान्द्वेष्टि शरीरे चरणं पवित्रं विततं पुराणं येन पूत

स्तरति उष्कृतानि॥ तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरा

तिंतरेम चरणे विलिप्य सजोषा इंद्र सगणो मरुद्भिः सोमं पि
बवृत्रहं छूर विद्वान् जहि शत्रुं रप मृधो नुदस्वाथाभयं कृ
णुहि विश्वतो नः मृत्तिकां शिरसि निधाय सुमित्रा न आप ओ
षधयः संतु आत्मानमाशिंष्य दुर्मित्रास्तस्मै भूयासुः॥ मनसा
ध्यायेत् योस्मान्द्वेष्टि अर्घ्यं त्रमोक्षिपेत् यंच वयं द्विष्मः द्वि
तीय अर्घ्यं त्रमोक्षिपेत् हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि
याचितः॥ यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः॥ यन्मे म

५

नसा वाचा कर्मणा वा दुष्कृतं कृतं तन्न इंद्रो वरुणो बृहस्पतिः
सविता च पुनंतु पुनः पुनः नमोग्नये प्सुमते नम इंद्राय नमो
वरुणाय नमो वारुण्यै नमोद्भ्यः यदपां क्रूरं यदमेध्यं यदशां
तं तदपगच्छतात् अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहा
त् तन्नो वरुणो राजा पाणिना ह्यवमर्शतु सोहमपापो विर
जो निर्मुक्तो मुक्तकिल्बिषः नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्म
सलोकतां॥ यश्चाप्सु वरुणः स पुनात्वघमर्षणः॥ वरुणं प्रार्थ्य

तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम भैरवायनमस्तुभ्यं अनु
ज्ञांदातुमर्हसि मागरस्पतुनिश्वासोदंडहस्तोसुरांतकः जगत्स्र
ष्टाजगन्मर्दी नमामित्वांसुरेश्वर इमंमंत्रं समुच्चार्यतीर्थेस्नानं
समाचरेत् अन्यथातत्फलस्यार्द्धं तीर्थेशोहरतिध्रुवं वरुणं
प्रार्थ्य इमंमेगंगेयमुनेसरस्वती शुतुद्रिस्तोमं सचतापरु
ष्णिया आसिक्नियामरुद्वृधे वीतस्तयार्जीकीये शृणुह्यासु
षोमया पाणिनोदकमावर्त्य स्नानंचसत्यंचाभिद्धात्तपसो

ध्यजायत। ततोरात्रिरजायत ततः समुद्रो अर्णवः समुद्रादर्णवा
दधिसंवत्सरो अजायत अहोरात्राणि विदधद्विश्वस्य मिषतो व
शी। सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंच पृथिवींचां
तरिक्षमथोस्वः आवृत्यात्त्वेनघमर्षणमंत्रेण त्रीन् प्राणा
यामान्कृत्वा सपवित्रैः पाणिभिः आपोहिष्ठामयोभुवः स्ता
नऊर्जेदधातन महेरणायचक्षसे योवःशिवतमोरसस्तस्य
भाजयतेहनः उशतीरिवमातरः तस्मा अरंगमामवोयस्यक्ष

यापजिन्वथ आपोजनयथाचनः हिरण्यवर्णाःशुचयः पावका
याः सुजातः कश्यपोयास्विंद्रः अग्निंयागर्भंदधिरेविरूपास्तान्
आपः शं स्योनाभवंतु यासां राजावरुणोयातिमध्ये [illegible]
[illegible] सत्यानृतेअवपश्यंजनानां मधुश्चुतः
शुचयोयाः पावकास्तानआपः शं स्योनाभवंतु यासांदेवादि
विकृण्वंतिभक्षंया अंतरिक्षेबहुधाभवंति याः पृथिवीपयसों
दंतिशुक्रास्तानआपः शं स्योनाभवंतु शिवेनमाचक्षुषा

पश्यतापः शिवयातनुवोपस्पृशत्वचंमे सर्वां अग्नीं रप्सु
षदोहुवे वोमयिवर्चोबलमोजोनिधत्त पवमानःसुवर्जनः
पवित्रेणविचर्षणिः यःपोतासपुनातुमा पुनंतुमादेवजनाः
पुनंतुमनवोधियाः पुनंतुविश्वआयवः जातवेदपवित्रवत्
पवित्रेणपुनाहिमा शुक्रेणदेवदीद्यत् अग्नेक्रत्वाक्रतूं रनु
यत्तेपवित्रमर्चिषि अग्नेविततमंतरा ब्रह्मतेनपुनीमहे उ
भाभ्यांदेवसवितः पवित्रेणसवेनच इदंब्रह्मपुनीमहे वैश्वदे

वीपुनतीदेव्यागात् यस्यैबह्वीस्तनुवो वीतपृष्ठाः तयामदंतःसध
माद्येषुवयं स्यामपतयोरयीणां वैश्वानरोरश्मिभिर्मापुना
तु वातःप्राणेनेषिरोमयोभूः द्यावापृथिवीपयसापयोभिः ऋ
तावरीयज्ञियेमापुनीतां बृहद्भिःसवितस्तृभिः वर्षिष्ठैर्देवमन्म
भिः अग्नेदक्षैःपुनाहिमा येनदेवाअपुनत येनापोदिव्यंकशः
तेनदिव्येनब्रह्मणा इदंब्रह्मपुनीमहे यःपावमानीरध्येति ऋ
षिभिःसंभृतंरसं सर्वंसपूतमश्नाति स्वदितंमातरिश्वना

पावमानीर्योअध्येति ऋषिभिःसंभृतंरसं सर्वंसपूतमश्ना
ति स्वदितंमातरि[illegible]
रसं तस्मैसरस्वतीदुहे क्षीरंसर्पिर्मधूदकं पावमानीस्वस्त्य
यनीः सुदुघाहिपयस्वतीः ऋषिभिःसंभृतोरसः ब्राह्मणेष्वमृतं
हितं पावमानीर्दिशंतुनः इमंलोकमथोअमुं कामान्समर्धयं
तुनः देवीर्देवैःसमाभृताः पावमानीस्वस्त्ययनीः सुदुघाहिघृ
तश्चुतः ऋषिभिःसंभृतोरसः ब्राह्मणेष्वमृतंहितं येनदेवापु

वित्रेण आत्मानं पुनते सदा तेन सहस्रधारेण पावमान्यः पुनं
तु मां प्राजापत्यं पवित्रं शतोद्यामं [illegible] हिरण्मयं तेन ब्रह्मविदो वयं
पूतं ब्रह्म पुनीमहे इंद्रः सुनीती सहमा पुनातु सोमः स्वस्त्या व
रुणः समीच्या यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मो
र्जयंत्या पुनातु स्नात्वाचम्य बहिरागत्य अन्योन्यस्मै दत्त्वा त्रि
यच्छेत् अस्नातो वा वस्त्रपरिधानादि कुर्युः इतिस्नानविधिः
अथ पंचगव्यं शरीरशुद्ध्यर्थं पंचगव्यमिश्रयणं करिष्ये

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदया
त् गोमूत्रं गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं । ईश्वरीं
सर्वभूतानां तामिहोपह्वये श्रियं गोमयं आप्यायस्व समे
तु ते विश्वतः सोमवृष्ण्यं भवा वाजस्य संगथे पय दधि
क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो मुखा करत्
प्रण आयूंषि तारिषत् दधि शुक्रमसि ज्योतिरसि तेजोसि आ
ज्यं देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाद

देकुशोदकं आपोहिष्टा॰ जनयंथाचनः मंथयेत् अघप्र

र्वे॰ शरीरशुध्यर्थं पंचगव्यप्राशनमहं करिष्ये ॐ प्रावायति

आचम्य इतित्रिः इतिपंचगव्यविधिः अघप्रवैाचिदिन व

र्त् देवऋषि पितृस्थापन पूजनंच करिष्ये इतिसंकल्प्यातत्रप

योगः ततः आचार्यशिष्यादिभिः सहप्राङ्मुख उपविश्यपाच

स्य देवगणादि पूजार्थं चतुरस्रां प्राक्प्रवणां उदक्प्रवणां

दक्षिणाप्रवणांच वेदिं कुर्यात् तत्रप्राक्प्रवणे भागे दे

१०

वै रुदगपवर्गाण्यासनानि कल्पयंति ब्रह्मणे आसनं क

ल्पयामीत्येवंसर्वत्र प्रजापतये आसनं कल्पयामि बृहस्पत

ये आसनं कल्पयामि अग्नये॰ वायवे॰ सूर्याय॰ चंद्रमसे॰ न

क्षत्रेभ्यः इंद्रायराज्ञे॰ यमायराज्ञे वरुणायराज्ञे सोमायरा

ज्ञे वैश्रवणायराज्ञे वसुभ्यः रुद्रेभ्यः आदित्येभ्यः विश्वे

भ्योदेवेभ्यः साध्येभ्यः ऋतुभ्यः ऋभुभ्यः मरुद्भ्यः अथर्वभ्यः

अंगिरोभ्यः इतित्रयोविंशतिदेवगणानामासनानि कल्प

यित्वा ततो निचीति उत्तरतः उदीचीनप्रवणे देशे उदगग्रैः
प्राक्संस्थानानि कल्पयंति विश्वामित्राय जमदग्नये भर
द्वाजाय गौतमाय अत्रये वसिष्ठाय कश्यपाय अ
नयोर्मध्ये अरुंधत्यै इत्यष्टावासनानि कल्पयित्वा देवेभ्यो
दक्षिणतः प्राक्प्रवणे देशे प्रागग्रमानेसमगस्त्याय तत
एवारभ्य प्राक्प्रवण... मेकस्यां वेद्यां कृष्णद्वैपाय
नादि इति हमपुराणां तेभ्य एकपंचाशत्कुशाः प्रागग्रैः दं

११

उदक्संस्थानि कल्पयति कृष्णद्वैपायनाय जातूकर्ण्याय तरु
क्षाय तृणबिंदवे वर्षिणे वरूथिने वाजिने वाजश्रवसे स
त्यश्रवसे सुश्रवसे सुतश्रवसे सोमशुष्मायणाय सत्व
वते बृहदुक्थाय वामदेवाय वाजिरत्नाय हर्यज्वायनाय
उदमयाय गौतमाय ऋणंजयाय ऋतंजयाय कृतंजयाय
धनंजयाय बभ्रवे त्र्यरुणाय त्रिवर्षाय त्रिधातवे शिबिना
य पराशराय विष्णवे रुद्राय स्कंदाय काशीश्वराय ०

ज्वराय· धर्माय· अर्थाय· कामाय· क्रोधाय· वसिष्ठाय· इंद्राय·
त्वष्ट्रे कर्त्रे· धर्त्रे· धात्रे· मृत्यवे· सवित्रे· सावित्र्यै· ऋग्वेदाय·
यजुर्वेदाय· सामवेदाय· अथर्ववेदाय· इतिहासपुराणा
य· इति ऋषीणामासनानि दत्वा एभ्यो दक्षिणतो दक्षिणाग्र
वर्णेदेन्द्रो दक्षिणाग्रैर्दर्भैः प्राचीनावितिनः प्रसगपर्वगाण्यास
नानि कल्पयंति वैशंपायनाय· पलिंगवे· तित्तिराय· उखाय·
आत्रेयाय· पदकाराय· कौंडिन्याय वृत्तिकाराय· सूत्रकारेभ्यः



सत्याषाढाय· प्रवचनकर्तृभ्यः आचार्येभ्यः ऋषिभ्यः वान
प्रस्थेभ्यः ऊर्ध्वरेतोभ्यः एकपत्नीभ्यः पित्रे· पितामहाय· प्र
पितामहाय· मात्रे· पितामह्यै· प्रपितामह्यै· मातामहा
य· मातुःपितामहाय· मातुःप्रपितामहाय· मातामह्यै·
मातुःपितामह्यै· मातुःप्रपितामह्यै· आसनं कल्पयामी
त्येवं सर्वत्र ततोयज्ञोपवीतं कृत्वा उदकेन ब्रह्माणं तर्प
यामीत्येवं सर्वत्र निवीतिनो विश्वामित्रादि इतिहासपुराणां

तान् ऋषीन् संतर्प्य प्राचीनावितिनो वैशंपायनादि पितॄन् यथा
धिकारं पित्रादींश्च सर्वेन तर्पयंति। ततो यज्ञोपवीतिनः ब्रह्मणे नमः
प्रजापतये नमः एवं सर्वत्र गंध पुष्प धूप दीपैरभ्यर्च्य निवीतेन
ऋषीन् प्राचीनावीतेन पितॄन्। यज्ञोपवीतिनः ब्रह्मणे स्वाहा
प्रजापतये स्वाहा। अन्नेन संतर्प्य। निवीति विश्वामित्राय स्वाहा
जमदग्नये स्वाहा० इति सर्व ऋषीनन्नेन संतर्प्य प्राचीनावी
ति। वैशंपायनाय स्वधा पैलिंगवे स्वधा तित्तिराय स्वधा० इ

१३

ति सर्व पितृभ्योऽन्नं स्वधा ततो यज्ञोपवीतिनः ब्रह्मणे नमः इति
नमस्कारैरुपस्थाय निवीति विश्वामित्राय नमः ऋषिभ्यः नम
स्कारैरुपस्थाय प्राचीनावीति। वैशंपायनादि पितृभ्यः नमस्का
रैरुपस्थाय अनेन कृतकर्मणा ब्रह्मादि देवेभ्यः विश्वामित्रादि
ऋषिभ्यः वैशंपायनादि पितृभ्यः प्रीयतां इति ऋषिपूजनं करा
वादि प्राणायामान् कृत्वा पुराणोक्त फलप्राप्त्यर्थं उत्सर्जनांगं
स्थंडिलादि सर्वकर्म करिष्ये। स्थंडिलं गोमयेनोपलिप्य उर्ध्वं

न्यमानमस्या अमेधं अपपाप्मानंयजमानस्यहंतु शिवानःसं
तुप्रदिशाश्वतस्रः शन्नोमातापृथिवीतोकसाता तिस्रप्राचीस्ति
स्रउदीचीरेखाःकृता शन्नोदेवीरभिष्टय आपोभवंतुपीतये शं
योरभिस्रवंतुनः सैकत्वमाग्नेयांनिरस्य अपउपस्पृश्य इंद्राय
नमः अग्नयेनमः यमायनमः निरृतेनमः वरुणायनमः वाय
वेनमः सोमायनमः ईशानायनमः मध्येअग्निस्था नायनमः १४
वैश्वानरस्यरूपं पृथिव्यांपरिस्रसा स्योनमाविशंतुनः भूर्भुवः

सुवः बलवर्धननामानमग्निंप्रतिष्ठापयामि चत्वारिशृंगा
त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभो
रोरवीतिमहोदेवोमर्त्यांआविवेश सप्तहस्तश्चतुःशृंगःस
प्तजिह्वोद्विशीर्षकः त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मि
तः स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा बिभ्रद्दक्षिण
हस्तेस्तुशक्तिमन्नंस्रुचंस्रुवं तोमरंव्यजनंवामेघृतपात्रंच
धारयन् आत्माभिमुखमासीन एवंरूपोहुताशनः अग्नेवै

श्वानरशांडिल्य गोत्रमेषध्वज प्रा मुखममसम्मुखोवरदोभव
देवतापरिग्रहार्थमन्वाधानंकरिष्ये समित्रदेवतापरिग्रहार्थ
मन्वाधानंकरिष्येसमित्रयमादायश्रद्धरोहसत्येनत्वाह्वयामि
इतित्रिः ३ याःपुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्चयाः ता नैरृमि
पवित्राग्निः श्रद्धांयज्ञमारभे आकूत्यैत्वाकामायत्वासमृधे
त्वापुरोदधे अमृत त्वामजीवसे आकूतिमस्यावसे
काममस्यसमृध्ये। इंद्रस्ययुंजते धियः आकूतिंदेवींमनसः पु
(१५)

रोदधेयज्ञस्यमातासुहवामेअस्तुयदिछामिमनसासकामोवि
देयमेनद्धृदयेनिविष्टं हृदयालंभः उदकस्पर्शः प्राणायामः
उत्सर्जनहोमकर्मणि यायक्ष्यमाणादेवताःस्ताःसर्वाःपरिग्र
हीष्यामि जातवेदसमग्निमिध्मेनयक्ष्ये आघारहोमे। प्रजाप
तिमनुमिंद्रं चाज्येनयक्ष्ये आज्यभागहोमे अग्निंसोमंचाज्येन
यक्षे सामान्यप्रधानहोमे अग्निंजातवेदसं॰सं॰राधनीः स
॰ राधनींदेवींप्रसाधनींदेवींव्याहृतीनामग्नींवायुःसूर्यंप्रजा

पतिंप्रत्येकमाज्येनयक्ष्ये वैषैषिकप्रधानहोमे प्रजापतिंकां
डऋषिंआज्येनयक्ष्ये २ सोमंकांडऋषिंआज्येनयक्ष्ये अग्निंकां
डऋषिंआज्येनयक्ष्ये विश्वान्देवान्कांडऋषिंआज्येनयक्ष्ये स्वयं
भुवंकांडऋषिंआज्येनयक्ष्ये सावित्रीआज्येनयक्ष्ये ऋग्वेदंआज्ये
नयक्ष्ये यजुर्वेदंआज्येनयक्ष्ये सामवेदंआज्येनयक्ष्ये अथर्व
वेदंआज्येनयक्ष्ये सदसस्पतिंआज्येनयक्ष्ये परमात्मानंयज्ञो
पवीतेनयक्ष्ये अंगहोमे वरुणंद्विः अग्निवरुणौद्विः अयासम

अयाभ्यातानूराष्ट्रभृत[illegible]: [illegible]

ग्निंप्रजापतिंप्रत्येकमाज्येनयक्ष्ये जयहोमे चित्तंचित्तिंआकूतं
आकूतिंविज्ञातंविज्ञानंमनःशक्करींदर्शपूर्णमासंबृहद्रथं
तरंप्रजापतिंप्रत्येकमाज्येनयक्ष्ये अभ्यातानहोमे अग्निंभू
तानामधिपतिं इंद्रंज्येष्ठानामधिपतिं यमंपृथिव्याधिपतिं वा
युंअंतरिक्षस्याधिपतिं सूर्यंदिवोधिपतिं चंद्रमसंनक्षत्राणा
मधिपतिं बृहस्पतिंब्रह्मणोधिपतिं मित्रंसत्यानामधिपतिं
वरुणंअपामधिपतिं समुद्रंस्रोत्यानामधिपतिं [illegible]

॰ साम्राज्यानामधिपतिं सोमं ओषधीनामधिपतिं सवितारं प्र
सवानामधिपतिं रुद्रं पशूनामधिपतिं उदकः स्पर्शः त्वष्टारं रू
पाणामधिपतिं विष्णुं पर्वतानामधिपतिं मरुतो गणानामधि
पतिं प्राचीनावीति पितॄन् पितामहान् परान् वरान् प्रत्येकमाज्ये
न यक्ष्ये यज्ञोपवीती अप उपस्पृश्य राष्ट्रभृद्धोमे अग्निं गंधर्वं ओ
षधीरप्सरसः सूर्यं गंधर्वं मरीचीरप्सरसः चन्द्रमसं गंधर्वं नक्षत्रा
ण्यप्सरसः यज्ञं गंधर्वं दक्षिणाप्सरसः मनो गंधर्वं ऋक्सामान्य

पर्जन्यं गंधर्वं विद्युतोप्सरसः ॥ २ प्रजापतिं त्रिं॰ वैश्वानरं दे मि॰ ॥ २

प्सरसः वातं गंधर्वं अपोप्सरसः भुवनस्यपतिं मृत्युं गंधर्वं विश्व
मप्सरसः अमृडयमृत्युं गंधर्वं प्रजा अप्सरसः कामं गंधर्वं आ
धीरप्सरसः मनो भुवनस्पतिं प्रत्येकमाज्येन यक्ष्ये स्विष्टकृ
द्धोमे अग्निं स्विष्टकृतं हुतशेषेण यक्ष्ये त्रिवृदन्नहोमे अग्निं
त्रिवृदन्नेन यक्ष्ये सोमं त्रिवृदन्नेन यक्ष्ये अग्निमन्नादं त्रिवृदन्नेन
यक्ष्ये अग्निमन्नपतिं त्रिवृदन्नेन यक्ष्ये सर्वा देवताः त्रिवृदन्नेनय
क्ष्ये अग्निं स्विष्टकृतं त्रिवृदन्नेन यक्ष्ये वास्तुपतिं बलिकरणेन

यक्ष्ये प्रायश्चित्तहोमे अग्निं त्रिः ३ अग्निंवरुणौद्विः इंद्रं द्विः त्र्यं
बकं विष्णुं अग्निं वायुं सूर्यं बृहस्पतिं वरुणं इंद्रं विश्वान्देवान्
आज्येनयक्ष्ये संस्रावहोमे वसून्रुद्रानादित्यान् संस्रावेणा
ज्येनयक्ष्ये एतादेवतासद्योयक्ष्ये ॐ भूर्भुवः सुवः स्वाहा प्रजा
पतयइदंनमम अन्वाधाय एषहिदेवःप्रदिशोनुसर्वाः पूर्वोहि
जातःसउगर्भेअंतः सविजायमानःसजनिष्यमाणः प्रत्यं
मुखास्तिष्ठतिविश्वतोमुखः यथाहत्तदसवोगौर्यंचित्पदि

16

हृदयमालभ्य।

षिनामुंचतायजत्राः एवात्वमस्मत्प्रमुंचाव्यंहः प्रातीये
ग्नेप्रतरान्नआयुः परिस्तीर्यपुरस्ताद्दक्षिणतः पश्चात् उत्तरतः
इध्मबंधनात् दक्षिणतब्रह्मणेइदमासनं उत्तरतःप्रणी
तायेइदमासनं क्षौदर्भोहिरण्ये गृहीत्वामयिगृह्णाम्यग्रेअग्निंरा
यस्पोषायसुप्रजास्त्वायसुवीर्याय मयिप्रजांमयिवर्चोदधा
म्यरिष्टाः स्यामतनुवासुवीराः योनोअग्निः पितरोहृत्स्वंतरम
र्त्योमर्त्यां आविवेश तमात्मन्परिगृह्णीमहेवयंमासोअस्मां

अंवहायपरांगान् पात्राण्यासादयेत् दर्वी आज्यस्थाली प्रणीता
प्रोक्षणी इध्मं बर्हिः उपवेशं संमार्गदर्भान् अवज्वलनदर्भान् आ
ज्यं त्रिवृद्दत्तं च सादयामि ब्रह्मप्रणितासंस्कारः ब्रह्मयज्ञान्
प्रथमं पुरस्ताद्विसीमतः सुरुचैवेन आवः सबुध्नियाउपमा
अस्यविष्टाः सतश्चयोनिमसतश्च विवः ब्रह्मणेनमः ब्रह्मा
णं आवाहयामि समावप्रच्छिंनाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कृ
त्वा अन्येन नखाच्छित्वा अद्भिरनुमृज्य पवित्रांतर्हिते पात्रे प आ



नै पवित्रे आज्यपात्रे निधाय ॥

नीय उपविलं पूरयित्वा उदगग्राभ्यां पवित्राभ्यां त्रिरुत्पूय उत्तरे
णाग्निं दर्भेषु सादयित्वा, दर्भैरपिदधाति तिरःपवित्रं प्रोक्षणीः
संस्कृत्य यथापुरस्तात् पात्राण्युत्तानानि कृत्वा इध्मं च वि
स्रस्य त्रिः सर्वाणि प्रोक्षति दर्वीं निष्टप्य संमृज्य पुनर्निष्ट
प्य निदधाति समामगनिभ्युक्ष्य पात्रावादधाति आज्यं विलाप्य
पवित्रांतर्हिताया माज्यस्थाल्या माज्यं निरूप्य उपवेषेण उद
वांगारान्निरूह्य तेष्वधिश्रित्य अवद्योत्य दर्भे तरुणाभ्यां

अग्निप्रणयनं २९

प्रत्यस्य त्रिः पर्यग्निकृत्वा उदगुद्वास्य अंगारान्प्रत्यूह्य उपयेत्रानि
रस्य अपउपस्पृश्य अपरेणाग्निं बर्हिरास्तीर्य तेषाम्य स्थालीमा
नीय पवित्रे विरलेकृत्वा उदगग्राभ्यां पवित्राभ्यां पुनराहारमा
ज्यं त्रिरुत्पूय पवित्रे प्रोक्ष्य अग्नावाधाय तूष्णीं परिदधाति
अपरेणाग्निमुदगग्रं प्राचीन कुशांमध्यमां निदधाति दक्षिणेनाग्निं
स्पृष्ट्वा मध्यमयाप्राचीनकुशां मपरेणाग्निं प्राङ्मुख उपविश्य
ति अदितेनुमन्यस्व अनुमतेनुमन्यस्व सरस्वतेनुमन्यस्व दे

२०

दक्षिणतोदर्वी

दक्षिणत उत्तर पारिधिसंधि मन्वमदृत्य
दक्षिण परि.

वसवितुः प्रसुव इध्ममद्भ्याभ्यादधाति ओम् अयंत इध्म
आत्मा जातवेदस्तेनेध्यस्ववर्धस्वचेंधिवर्धय चास्मान्प्रजया
पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा जातवेदसे अ
ग्नय इदंनमम आघारहोमे प्रजापतयेमनवे स्वाहा प्रजापत
ये मनव इदंनमम इंद्राय स्वाहा इंद्रायेदंनमम अग्नये स्वाहा
अग्नय इदंनमम सोमाय स्वाहा सोमायेदंनमम युक्तो वह जा
तवेदः पुरस्तादग्ने विद्धि कर्मक्रियमाणं यथेदं त्वं भिषक् भेषजस्या

सीकर्त्तात्वयागा अश्वान्नेम स्वाहा जातवेदसे ग्नय इदंनम
म पाति रश्मीनिपद्यसे अहंवो धरणी इति तांत्वाग्नस्य धारय
ग्नो स०ाधनीयजे स्वाहा से०ाधन्या इदंनमम स०ाधन्यै दे
व्यैस्वाहा स०ाधन्यै देव्या इदंनमम प्रसाधन्यै देव्यै स्वाहा प्र
साधन्यै देव्या इदंनमम भूः स्वाहा अग्नय इदंनमम भुवः स्वाहा
वायव इदंनमम सुवः स्वाहा सूर्यायेदंनमम भूर्भुवः सुवः स्वा
हा प्रजापतय इदंनमम प्रधानहोमे प्रजापतये कांडर्षये स्वा

हा प्रजापतये कांडर्षय इदंनमम सोमाय कांडर्षये स्वाहा
सोमाय कांडर्षय इदंनमम अग्नये कांडर्षये स्वाहा अग्नये कां
डर्षय इदंनमम विश्वेभ्यो देवेभ्यः कांडर्षिभ्यः स्वाहा विश्वेभ्यो
देवेभ्यः कांडर्षिभ्य इदंनमम स्वयंभुवे कांडर्षये स्वाहा स्वयंभु
वे कांडर्षय इदंनमम सावित्र्यै स्वाहा सवित्र्या इदंनमम ऋग्वे
दाय स्वाहा ऋग्वेदायेदंनमम यजुर्वेदाय स्वाहा यजुर्वेदायेदं
नमम सामवेदाय स्वाहा सामवेदायेदंनमम अथर्ववेदाय

२२

स्वाहा अथर्ववेदायेदंनमम सदसस्पतयेस्वाहा सदसस्पतय
इदंनमम यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात्
आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजःस्वाहा
परमात्मन इदंनमम दत्वाधारयेत् केशवादि फलप्रा...मोऽ
तस्मार्तकर्मानुष्ठानसिध्यर्थंयज्ञोपवीतसंस्कारंकरिष्ये आपो
हिष्ठेतितिसृभिः हिरण्यवर्णा इतिचतसृभिः पवमानःसुवर्ज
न इति चैतेनानुवाकेन इति मार्जयित्वा देवस्यत्वासवितुःप्रस

२२

सोमंच पिदन्...

वेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददे त्रिस्त्राउयेत् त्र पृथिवींच ए
धिंचमांच त्रीं० भूर्लोकांस्संवत्सरंच प्रजापतिस्त्वासादयतु
तयादेवतयांगिरस्वद्ध्रुवासीद भुवोवायुंचांतरिक्षंचमांच त्री०
स्वरादित्यंचदिवंचमांच त्री० भूः० भूर्भुवःस्वश्चंद्रमसंचदिश
श्चमांच त्री० ॐकारंप्रथमतंतौन्यसामि अग्निंद्वितीयतंतौ
न्यसामि नागांस्तृतीयतंतौन्यसामि प्रजापतिंषष्टतंतौन्यसा
मि वायुंसप्तमतंतौन्यसामि सूर्यंअष्टमतंतौन्यसामि वि

श्चान्देवान्नवमनेनोन्यसामि उद्वयंतमसस्परीत्यादित्यायद
र्शयित्वागायत्रीजपेत् श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थं यज्ञो
पवीतधारणमहंकरिष्ये इतिसंकल्प्य यज्ञोपवीत इतिमंत्रेण
धारयेत् आचम्य उत्सर्जनांगवेदाध्ययनंकरिष्ये ॐइषे
त्वोर्जेत्वावायवस्थोपायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ट
तमायकर्मणआप्यायध्वमघ्नियादेवभागमूर्जस्वतीः पय
स्वतीः प्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघशंसो

२३

अ

रुद्रस्यहेतिः परिवोवृणक्तुध्रुवाअस्मिन्गोपतौस्यातबह्वीर्य
जमानस्यपशून्पाहि नमोब्रह्मणेनमोऽस्त्वग्नयेनमः पृथिव्यै
नमओषधिभ्यः नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृह
तेकरोमि इतित्रिः ३ ॐशांतिःशांतिःशांतिः उत्सृष्टावैवेदाः
प्रयोगः ततआचार्यःदर्भासनःदर्भपाणिः शिष्यादिभिः
सह इषेत्वेत्यनुवाकमात्रमधीत्य अथवापंचानांचतुर्णां
वाकांडानांआदितः पंचचतुरोवाकान्पठित्वा एकाहमनध्यायः

अथवेदोपाकर्मप्रयोगः इषेत्वेत्यादिमनुवाकत्रयंपठेत्। अथवा
पंचानांकांडानामदितः पंचानुवाकान्पठेत्। इषेत्वा आपउंद
तु युंजानःप्रथमं अनुमत्यैपुंसहवैदेवानांच उपाकृत्तावैवेदाः
चाहमेकाहंवानध्ययनःकार्यः इत्युक्तातत इमंमेवरुणेत्यादि
संस्थाजपांतंकृत्वानात्रिविरदन्नहोमः प्रयोगः अंगहोमः इमंमे
वरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके स्वाहा। वरुणा



येदंनमम तत्वायामिब्रह्मणावंदमानःस्तदाशास्तेयजमानो
हविर्भिः अहेडमानोवरुणेहबोध्युरुशंस मानआयुःप्रमोषीः
स्वाहा। वरुणायेदंनमम त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोव
यासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानो विश्वाद्वेषांसिप्रमु
मुग्ध्यस्मत्स्वाहा। अग्नीवरुणाभ्यामिदंनमम सत्वन्नोअग्नेवमोभ



वोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्मणोवरुणंरराणोवीहि
मृडीकंसुहवोनएधिस्वाहा। अग्निवरुणाभ्यामिदंनमम त्वम
ग्नेअयास्ययासन्मनसाहितः अयासन्हव्यमूहिषेयानोधेहिभे

प्रजां॰ स्वाहा अयसेऽयम इदंनमम प्रजापते न त्वदेतान्यन्यो
विश्वाजातानिपरिताबभूव यत्कामास्तेजुहुमस्तन्नो अस्तु
वयं॰स्यामपतयोरयीणां॰ स्वाहा प्रजापतय इदंनमम । होम
चित्तंचस्वाहा चित्तायेदंनमम चित्तिश्चस्वाहा चित्तय इदंनमम
आकूतंच स्वाहा आकूतायेदंनमम आकूतिश्चस्वाहा आकू
त्यायेदंनम विज्ञातंचस्वाहा विज्ञातायेदंनमम मनश्चस्वाहा
मनस इदंनमम शक्करीश्चस्वाहा शक्करीभ्य इदंनमम दर्शश्च

२५
विज्ञानं च २

पूर्णमासायेदं । बृहच्च स्वाहा

स्वाहा दर्शायेदंनमम पूर्णमासश्च स्वाहा बृहत इदंनमम रथं
तरंचस्वाहा रथंतरायेदंनमम प्रजापतिर्जयानिंद्राय वृष्णेप्रा
यच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमंतसर्वाः सउग्रः सहिह
व्योबभूवः स्वाहा प्रजापतय इदंनमम अभ्यातानहोमः अग्नि
र्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशि
ष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां॰ स्वाहा अग्नये भू
तानामधिपतय इदंनमम इंद्रो ज्येष्ठानामधिपतिः समावत्व...

ब्रसन्नस्मिन्क्षत्रे स्यामासिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां
देवहूत्या ७ स्वाहा इंद्रायज्येष्ठानामधिपतयइदंनमम यमःपृ
थिव्याधिपतिः समावत्वस्मिंब्रह्मन्नस्मिन्क्षत्रे स्यामासिष्यस्यांपु
रोधायामस्मिन्कर्मन्नस्यांदेवहूत्या ७ स्वाहा यमायपृथिव्याधिपत
यइदंनमम वायुरंतरिक्षस्याधिपतिः समावत्वस्मिंब्रह्मन्नस्मि
न्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्या ७
स्वाहा वायवेअंतरिक्षस्याधिपतयइदंनमम सूर्योदिवोधिपतिः

समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मि
न्कर्मन्नस्यांदेवहूत्या ७ स्वाहा सूर्यायदिवोधिपतयइदंनमम
चंद्रमानक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे
स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्या ७ स्वा
हा चंद्रमसेनक्षत्राणामधिपतयइदंनमम बृहस्पतिर्ब्र
ह्मणोधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे स्यामाशिष्यस्यां
पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्या ७ स्वाहा। बृहस्पतेब्रह्म

२८

योधिपतय इदंनमम मित्रः सत्यानामधिपतिः समावत्वस्मि
न्ब्रह्मन्नस्मिन्क्षत्रे स्यामासिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां
देवहूत्यां स्वाहा मित्राय सत्यानामधिपतय इदंनमम वरुण
अपामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे स्यामासिष्यस्यां पु
रोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा वरुणाय अपामधि
पतय इदंनमम समुद्रः स्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्म
न्नस्मिन्क्षत्रे स्यामासीष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देव

२७

हूत्यां स्वाहा समुद्राय स्रोत्यानामधिपतय इदंनमम अन्नं
साम्राज्यानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे स्यामासि
ष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा अन्नाय सा
म्राज्यानामधिपतय इदंनमम सोम ओषधीनामधिपतिः स
मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे स्यामासिष्यस्यां पुरोधायामस्मि
न्कर्मन्नस्यां देवहूत्यां स्वाहा सोमाय ओषधीनामधिपतय
इदंनमम सविता प्रसवानामधिपतिः समावत्वस्मिन्ब्रह्मन्न

स्मिन्क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मि कर्मन्नस्यांदेवहूत्याः
स्वाहा सवित्रे प्रसवानामधिपतय इदं न मम रुद्रः पशूनाम
धिपतिः स मावत्वस्मि न्ब्रह्मन्नस्मिन्क्षत्रे स्यामाशिष्यस्यां पुरो
धायामस्मिन्कर्मन्नस्यांदेवहूत्याः स्वाहा रुद्राय पशूनामधि
पतय इदं न म उदकस्पर्शः त्वष्टा रूपाणामधिपतिः स माव
त्वस्मि न्ब्रह्मन्नस्मिन्क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्क
र्मन्नस्यांदेवहूत्याः स्वाहा त्वष्ट्रे रूपाणामधिपतय इदं न म

२८

म विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे
स्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याः स्वाहा
विष्णवे पर्वतानामधिपतय इदं न मम मरुतो गणानामधि
पतयस्ते मावंत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे स्यामाशिष्यस्यां पुरोधा
यामस्मिन्कर्मन्नस्यांदेवहूत्याः स्वाहा मरुद्भ्यो गणानाम
धिपतिभ्य इदं न मम प्राचीनावीति पितरः पितामहाः पर
वेरन्नतास्ततामहा इह मावत अस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्या

२८

मासिष्यस्यां पुरोधायामस्मिन्कर्मन्यस्यां देवहूत्यां स्वाहा
पितृभ्यः पितामहेभ्यः परेभ्योवरेभ्य इदंनमम यज्ञोपवीतीत्यप
उपस्पृश्य राष्ट्रभृद्धोमः ऋताषाडृतधामाग्निर्गंधर्वः स इदं ब्रह्मक्ष
त्रं पातु तस्मै स्वाहा अग्नये गंधर्वायेदंनमम तस्यौषधयोऽ
प्सरस ऊर्जो नाम ता इदं ब्रह्मक्षत्रं पांतु ताभ्यः स्वाहा ओषधी
भ्योऽप्सरोभ्य इदंनमम संहितो विश्वसामा सूर्यो गंधर्वः स इ
दं ब्रह्मक्षत्रं पातु तस्मै स्वाहा सूर्याय गंधर्वायेदंनमम तस्य

२०

मरीचयोऽप्सरस आयुवो नाम ता इदं ब्रह्मक्षत्रं पांतु ताभ्यः स्वा
हा मरीचिभ्योऽप्सरोभ्य इदंनमम सुषुम्नः सूर्यरश्मिश्चंद्रमा
गंधर्वः स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा चंद्रमसे गंधर्वाय
इदंनमम तस्य नक्षत्राण्यप्सरसो बेकुरयो नाम ता इदं ब्रह्मक्ष
त्रं पांतु ताभ्यः स्वाहा नक्षत्रेभ्योऽप्सरोभ्य इदंनमम भुज्युः सु
पर्णो यज्ञो गंधर्वः स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा यज्ञाय गं
धर्वायेदंनमम तस्य दक्षिणा अप्सरसस्तवा नाम ता इदं ब्रह्म

वातायगंधर्वायद।त
भ्यस्वाहा।६

त्त्रंपातुताभ्यःस्वाहा दक्षिणाभ्योप्सरोभ्यइदंनमम प्रजापति
विश्वकर्मामनोगंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा मन
सेगंधर्वायेदंनमम तस्यऋक्सामान्यप्सरसोवन्हयोनामताइ
दंब्रह्मक्षत्रंपातुताभ्यःस्वाहा ऋक्सामेभ्योप्सरोभ्यइदंनमम
इषिरोविश्वव्यचावातोगंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वा
हा अद्भ्योप्सरोभ्यइदंनमम भुवनस्पतेयस्यतउपरिगृहाइ
हचसनोरास्वाज्यानिꣳरायस्पोषꣳसुवीर्यꣳसंवत्सरीणा

५

ꣳस्वस्तिꣳस्वाहा भुवनस्यपत्यइदंनमम परमेष्ठ्यधिपतिर्मृ
त्युर्गंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा मृत्यवेगंधर्वाये
दंनमम तस्यविश्वमप्सरसोभुवोनामताइदंब्रह्मक्षत्रंपातु
ताभ्यःस्वाहा विश्वस्माअप्सरोभ्यइदंनमम सुक्षितिःसुभूतिर्भ
द्रकृत्सुवर्वान्पर्जन्योगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा प
र्जन्यायगंधर्वायेदंनमम तस्यविद्युतोप्सरसोरुचोनामता
इदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा विद्युद्भ्योप्सरोभ्यइदंनमम

दूरेहेतिरमृडयो मृत्युर्गंधर्वः स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा
अमृडाय मृत्यवे गंधर्वायेदं नमम तस्य प्रजा अप्सरसो भीरुवो
नामता इदं ब्रह्मक्षत्रं पांतु ताभ्यः स्वाहा प्रजाभ्योऽप्सरोभ्य इदं
नमम चारुः कृपणकाशी कामो गंधर्वः स इदं ब्रह्मक्षत्रं पातु त
स्मै स्वाहा कामाय गंधर्वायेदं नमम तस्याधयोऽप्सरसः शोच
यंतीर्नामता इदं ब्रह्मक्षत्रं पांतु ताभ्यः स्वाहा अधिभ्योऽप्सरो
भ्य इदं नमम सनोभुवनस्पते यस्य त उपरि गृहा इह च उरु

३१

ब्रह्मणे स्मै क्षत्राय महि शर्म यच्छ स्वाहा सनोभुवनस्पत्य इ
दं नमम स्विष्टकृद्धोमः यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमि
हाकरं अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे
अग्नये स्विष्टकृते सुहुतहुते सर्वहुत आहुतीनां कामानां
समर्धयित्रे स्वाहा अग्नये स्विष्टकृत इदं नमम त्रिरदन्त्रहोमः
अग्नये स्वाहा अग्नय इदं नमम सोमाय स्वाहा सोमायेदं न
मम अग्नयेऽन्नादाय स्वाहा अग्नयेऽन्नादायेदं नमम अग्नयेन्न

३२

पतयेस्वाहा अग्नयेन्नपतय इदंनमम प्रजापतयेस्वाहा प्रजा
पतय इदंनमम विश्वेभ्योदेवेभ्यःस्वाहा विश्वेभ्योदेवेभ्य इद
नमम सर्वाभ्योदेवताभ्यःस्वाहा सर्वाभ्योदेवताभ्य इदंनमम
अग्नयेस्विष्टकृतेस्वाहा अग्नयेस्विष्टकृत इदंनमम वास्तुपत
येस्वाहा वास्तुपतय इदंनमम उदकस्पर्शः त्रिरुदन्वारब्धस्य
कर्मणः पुण्याहंभवंतोब्रुवंतु स्वस्ति० ऋद्धिं० शुल्वप्रहरणं र.३२
प्रायपश्च० परिध्यंजनं परिसमूहनं यथाहनदसोगोर्यविस्यदिषिनाम

[illegible]
आदाय [illegible]भ्यर्चयनक्ति॥
मुंचनायजत्राः एवात्वमस्मन्प्रमुंचाव्यंहःभता यग्नेप्रतरान्न
आयुः अयंदर्व्यामिध्मस्य आज्यस्थाल्यामिध्ममध्यआज्यस्था
ल्यामयंदर्व्या एकंत्रणमवशिष्य ॐस्वाहा एतदेतदेतव घ्राणं सर्वेभ्यः
चक्षुः पृथिविंचअपउपचपरयं परिधीन्प्रहरति मध्यमंमध्ये सहैव
करोति अस्मिन्कर्मणि स्वराक्षरपदवर्णन्यूनातिरिक्त
दोषपरिहारार्थं अनाज्ञातादिप्रायश्चित्तहोमंकरिष्ये अन सा
तंयदाज्ञातंयत्तस्यक्रियते मिथु अयेत्तदस्यकल्पयत्वं ५ह

वेष्ययथातथꣳ स्वाहा अग्नयइदंनमम पुरुषसंम्मितोयज्ञोय
ज्ञः पुरुषसंमितः अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳ
स्वाहा अग्नयइदंनमम यत्पाकत्रामनसादीनदक्षानयज्ञस्य
मन्वतेमर्त्त्यासः अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्टोदेवाꣳऋ
तुशोयजातिस्वाहा अग्नयइदंनमम त्वन्नोअग्नेवरुणस्यवि
द्वान्देवस्यहेडोऽवयासिसीष्टाः यजिष्टोवह्नितमःशोशुचानोवि
श्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा अग्निवरुणाभ्यामिदंनमम

33

सत्वन्नोअग्नेवमोभवोतीनेदिष्टोअस्याउषसोव्युष्टो अवयक्ष्व
णोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधीस्वाहा अग्नीव
रुणाभ्यामिदंनमम यतइंद्रभयामहेततोनोअभयंकृधि मघ
वन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहिस्वाहा इंद्राये
दंनमम स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी वृषेंद्रःपु
रएतुनः स्वस्तिदाअभयंकरःस्वाहा अभयंकरायेदंनमम
त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधना

र्त्योर्मुक्षीयमामृतात्स्वाहा त्र्यंबकायेदंनमम इदंविष्णुर्वि
चक्रमेत्रेधानिदधेपदं समूढमस्यपां सुरे स्वाहा विष्णवइ
दंनमम भूःस्वाहा अग्नयइदंनमम भुवःस्वाहा वायवइदंन
मम सुवःस्वाहा सूर्यायेदंनमम महस्स्वाहा बृहस्पतय
इदंनमम जनःस्वाहा वरुणायेदंनमम तपःस्वाहा इंद्रायेदं
नमम सत्यं स्वाहा विश्वेभ्योदेवेभ्यइदंनमम वसुभ्यो
रुद्रेभ्य आदित्येभ्यस्वाहा वसुभ्योरुद्रेभ्यआदित्येभ्यः सं स्रा

३४

वभागेभ्यइदंनमम बर्हिषिपूर्णपात्रं निनयेत् सदसि सन्मे
भूयाः सर्वमसि सर्वमेभूयाः पूर्णमसि पूर्णमेभूयाः अक्षित
मसिमामेक्षेष्ठाः प्राच्यां दिशिदेवा ऋत्विजोमार्जयंतां दक्षिणा
यां दिशिमासाः पितरोमार्जयंतां प्रतीच्यांदिशि गृहाःप
शवोमार्जयंतां उदीच्यांदिश्यापओषधयो वनस्पतयोमार्ज
यंतां ऊर्ध्वायांदिशियज्ञः संवत्सरो यज्ञपतिमार्जयंतां स
मुद्रंवःप्रहिणोम्यक्षिता स्वांयोनिमपिगच्छतात् अच्छिद्रः

६०

परिस्तरणात्पुनः

यो

प्रजोन्नयासं मापरासेचिमत्ययः यदमुनेसरस्वति गोष्वश्वे
षुयन्मधु तेनमेवाजिनीवतिमुखमंग्धिसरस्वति मुखेवि
मृष्ट पूर्णपात्रप्रतिनिधिन्नंब्रह्मणेदक्षिणांदानुमहमु
त्सृजेत तेनश्रीब्रह्मादेवतानांप्रीयतां अदिनेत्वम ८ स्थाः सर
स्वतेत्वम ८ स्थाः देवसवितः प्रासावीः यज्ञनमस्तेयज्ञ नमो
नमस्वेयज्ञ सिवेनमेसंतिष्ठस्व स्योनेनमेसंतिष्ठस्व सु
नेनेनमेसंतिष्ठस्व ब्रह्मवर्चसेनमेसंतिष्ठस्व यज्ञस्यर्द्धि

अनुम

३५

मनुसंतिष्ठस्व उपतेयज्ञनमः उपतेनमः उपतेनमःसर्वमे
त्रेषुतिष्ठति मेधावीतेजस्वीवर्चस्वी ब्रह्मवर्चसी आयुष्मा
न्नन्नपासंस्वस्तिश्रद्धांमेधांयशः प्रज्ञांविद्यांबुद्धिंश्रियंब
लं आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनः प्रमादात्कु
र्वतांकर्मप्रच्यवेदाध्वरेषुयत् स्मरणादेवतद्विष्णोः संपू
र्णस्यादितिश्रुतिः विष्णवेनमः विष्णवेनमः विष्णवेनमः
अग्नयेनमः चंदनं अलंकारार्थेअक्षतान् पूजार्थेपुष्पा

पिसः ॥ धूपं ॥ दीपं ॥ नैवेद्यं ॥ तांबुलं ॥ दक्षिणां सः ॥ वैश्वान
राय विद्महे ॥ लालीलाय धीमहि ॥ तन्नोऽग्निः प्रचोदया
त् ॥ अग्नये नमः ॥ मंत्रपुष्पं समर्पयामि ॥ नमस्करोमि ॥ अनेन उ
त्सर्जन होमेन ॥ यथाज्ञानेन ॥ तेन श्रीयज्ञभोक्ता यज्ञनारा
यणः प्रीयतां ॥ र्थं ॥ उत्सर्जनाख्यस्य कर्मणः ॥ न्यूनांगता
सिध्यर्थं तत्संपूर्णफलावाप्त्यर्थं दशाधिक ॥ ब्राह्मण
भोजयिष्ये ॥ तेषां प्रजन मरु करिष्ये ॥ स्तु ॥ र्थं पर्जन्य
स्थानि करिष्ये ॥ मारुत मसि मरुतां ॥ मोजोपां धारां निर्भि ॥
देवावसव्या अय ॥ सोमस्त्वं ॥ मारुत मसि मरुतां मोजः इति
देवावसव्यारेः ॥ इति चत्वारि अनुवाकः ॥ स्तचां प्राची इत्य
नुवाकः ॥ ॥ इति उत्सर्ज विधि समाप्तः ॥ ॥ श्रीरस्तु ॥ ५ पा
कर्ण प्रयोगः । श्री यथोक्त भिर्ब्राह्मणेः सह वेदोपाकरणाख्यं कर्म
करिष्ये । तदंगत्वेन स्नानं पुं ॥ पुण्याहवाचनं मातृकापूजनं नांदी ॥
सकल्पसूक्तपठनं मार्जनं चाघमर्षणं ॥ स्नानं गालपण
चैव गृहे पंच विवर्जयेत् ॥ बा कं भट अभ्यंकर

रिष्यं आदौ गणपतिं संपूज्य पुण्याहं वाचयेत्॥ श्रुतिस्मृति
पुराणोक्तफलप्राप्त्यर्थं आचारादात्मविशुध्यर्थं भस्मगोम
यमृत्तिकास्नानानि करिष्ये इति संकल्प्य॥ जलसमीपं गत्वा
भस्मादाय ईशानायनमः इति शिरसि तत्पुरुषायनमः इति
मुखे अघो[illegible]यनमः इति हृदये वामदेवायनमः इति गुह्ये
सद्योजातायनमः इति पादयोः अग्निरिति भस्म वायुरिति
भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म

सर्वं॰ह्वा इदं भस्म॥ मानस्तोके तनये मन आयुषि मा नो गो

षु मा नो अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र भामिनो वधीर्ह

विष्मंतो नमसा विधेम ते॥ सर्वांगे भस्म विलिप्य स्नात्वा

चम्य॥ ततो गोमयस्नानं॥ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य

धीमहि धियो यो नः प्रचोदयात्॥ गंधद्वारां दुराधर्षां नित्य २

पुष्टां करीषिणीं॥ ईश्वरीं॰ सर्वभूतानां तामिहोपह्वये श्रि

यं गोमयं हस्ते गृहीत्वा॥ अयं मंत्र श्वेरंती नामोषधीना

[OrderDescription]
,CREATED=16.09.19 10:57
,TRANSFERRED=2019/09/16 at 11:09:11
,PAGES=38
,TYPE=STD
,NAME=S0001801
,Book Name=M-226-UTSARJ VIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF

FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,